[This question paper contains 3 printed pages.]

| | | |
|---|---|---|
| **Roll Number** | **:** | |
| **Unique Paper Code** | **:** | **121303408** |
| **Title of the Paper** | **:** | **Sanskrit Novel and Survey of Modern Sanskrit Literature**<br>**संस्कृत उपन्यास तथा आधुनिक संस्कृत साहित्य का सर्वेक्षण** |
| **Name of the Course** | **:** | **MA Sanskrit Examination, May 2025** |
| **Type** | **:** | **OEC** |
| **Semester** | **:** | **IV** |
| **Duration** | **:** | **3 Hours** |
| **Maximum Marks** | **:** | **70** |

इस प्रश्नपत्र के मिलते ही ऊपर दिए गए निर्धारित स्थान पर अपना अनुक्रमाङ्क लिखिए।
(Write Your Roll No. on the top immediately on receipt of this question paper.)

**टिप्पणीः** अन्यथा आवश्यक न होने पर इस प्रश्नपत्र का उत्तर **संस्कृत** या **हिन्दी** या **अंग्रेजी** में से किसी एक भाषा में दीजिए।
**Note:** Unless otherwise required in a question, answers should be written either in Sanskrit **or** in Hindi **or** in English.

**सभी प्रश्नों के उत्तर दीजिए।**
**Attempt all questions.**

1. **निम्नलिखित की सप्रसङ्ग व्याख्या कीजिए –** **7X4=28**
**Explain the following with context –**

**(i)** अहर्दिवं प्रवर्त्तमानायामस्यां चौर्यपरम्परायामेकदा निशीथे प्राविशमपरिचिते कुत्रचिदुटजे। दृश्यं तत्रत्यमासीदतिविस्मयावहम्। उटजे तस्मिन् न्यवसन् जनास्त्रयः - वृद्धः, वृद्धा, कुमारश्च। चौरविद्याप्रभावेण सर्वं तत्रत्यं सम्यगद्राक्षमपि। किन्तु न किमपि कस्माच्चिदपि कोणात् स्वापतेयं भोज्यं भोग्यं वा द्रष्टुमपार्यत। यस्य गृहे नास्त्येकोऽपि कणः कस्यचिदन्नस्य, नापि च कुत्रचिद् दृश्यते कांस्यभाजनमपि, स्थाली, जलपात्रमपि वा, कथं स वर्त्तयते जीविकाम्?

**अथवा/OR**

अथ कदाचित् राजा सपरिवारः पुनराश्रमपदं जगाम। न्यवेदयत स सहजैर्भावैः सर्वमिमं परमविस्मयावहं संस्कारवृत्तान्तं ब्रह्मर्षये। सर्वं तूष्णीमाकर्णितवत्यपि नालक्ष्यत कश्चित् प्रहर्ष उद्वेगो वा ब्रह्मर्षौ। ओमित्युक्त्वा क्षणं ध्यानमग्नः स बभूव। एतदभ्यन्तरे यज्ञशालाकर्मणि व्यापृतामाश्रममातरं प्रणम्य प्रतिनिवृत्ताः कुमारसहचराः राजमहिषीराजकुमारी-राजकुमाराः। क्रमेण सर्वेऽपि ते ब्रह्मर्षिमभ्यवादयन्। व्युत्थिते ब्रह्मर्षौ तानाशीर्भिरभियोजितवति तेऽपि तत्रैवोपाविशन्।

(ii) पुनराजगाम सैव तिथिरष्टमी। कुमारश्चाजगाम राजधानीम्। प्रवचनात् पूर्वं पपात तस्य राजपरिवारे दृष्टिः। ऋते राजमहिष्याः कृत्स्नोऽपि चिन्ताशङ्काकुलो राजपरिवारः क्रान्तप्रज्ञमप्याकुलयदेव कुमारम्। प्रवचनान्ते कुमार इदम्प्रथमतयाऽद्य राजपरिवारं पृथक् समबोधयत्। पप्रच्छ च स राजानं 'किमिति लक्ष्यन्ते विषादरेखाः सर्वेषामेव भवतां मुखमण्डले। अपि किमपि शक्यते प्रतिविधातुमस्माभिरिति'।

**अथवा/OR**

दृष्ट्वैव तमद्य कुमारः स्वासनादुत्थाय नियतस्थान उपावेशयत्। अपृच्छच्च सः - त्वां दृष्ट्वैव सर्वे वयं प्रसीदामः। अपि सर्वं कुशलं ते? अपि समागतोऽसि श्रीमद्भगवद्गीतायाः पञ्चमाध्यायस्य तमष्टमं

पश्यञ्छृण्वन्स्पृशन्नित्याद्यं श्लोकं पुनरनुशीलयितुम्? सर्वमद्य सुगमीकरिष्यामि। श्रान्तोऽसि मन्ये। प्रथमं जलमानयामि। पिब जलम्। निर्भरमुपविश। तातपादा अपि त्वां स्मरन्ति सदैव सस्नेहम्।

(iii) ग्रामे ग्रामे राजप्रजासुखसंवर्धकानि कृषिगोरक्ष्यवाणिज्यमहोपकरणानि सर्वसमर्धकानि। प्रतिगृहमनेके गुणकर्मविभागशः समुद्यमव्यवसायाः सुनिश्चिताः परस्पराश्रयाः स्वतन्त्राः सर्वोप- कारकाः स्वसमीरिताः। न कुत्रचिदभावग्रस्तता कीदृगपि। सर्वेऽपि नराः सर्वा अपि नार्यः स्वयं वर्धिता यथाशक्ति यथाप्रतिभं यथा समवर्धयँश्च। अभावश्चैकान्त्येनाभवन् निरक्षरताया अकृतविद्यताया दीनताया अस्वच्छताया दुराचारिताया अशिष्टतायाः कृतघ्नतायाः सदवमाननाया अश्रद्धाऽविश्वासाविनयशीलताया हठधर्मताया विवादविद्याया मदधनस्य परपीडनशक्तेश्च।

**अथवा/OR**

किमन्यत् कुर्यात् कुमारः शाश्वतबुद्धिवैभवशाली। एवमेव दर्श दर्श दृश्यानि श्रावं श्रावं च श्रव्याणि सर्वाणि बभ्राम कतिपयान् मासान् नृसिंहराज्ये प्रच्छन्नवेषः कुमारः सुविभावयन्त संस्कारकाणि तत्त्वानि तत्त्वत्तः संस्कार्याणि। स्वतन्त्रः स समीरण इवावर्त्तत। किन्तु नावहत् स गन्धस्ततस्त्यान्। शनैः शनैरदृष्टश्रुतपूर्वास्वपि स्थितिषु तासु तासु नैव किञ्चित् करोमीति भावनया भावितसमस्तान्तःकरणः शुद्धबुद्धमुक्तस्वभावो निरञ्जनो विवेकी पश्यन्निव 'सत्यं शिवं सुन्दरं' सर्वान्तःसारं स गुरोरनुग्रहं शिरसि दधत् सानन्दं विजहार नृसिंहराज्ये प्रतिकोणम्।

(iv) क्वचिच्चादर्शि दृश्यं निजतनुविक्रयस्य दारुणं कुलकन्यकानामपि वृद्धरुग्णपितृचिकित्सासम्पोषणै–कलक्ष्याणाम्। तत्रैवासीद् दृश्यमहिंसासत्यास्तेयब्रह्मचर्यापरिग्रहशौचसन्तोषतपःस्वाध्यायेश्वर–प्रणिधानप्राणहरणपरायणैः सत्सुयशोलुण्ठनकुशलैरशान्तिसैन्यशक्तिमत्तमस्य, नाम विभ्रतेऽपि विद्याया, अविद्योत्तमैः संस्थापितस्याविद्यास्थानस्याकृतविद्याविद्यार्थिसङ्कुलस्य, यत्र परस्पराधाता एवासन् महायज्ञानुष्ठानप्रतिनिधयः, कोलाहलाः कलहमया असंस्कृता एवासन् वेदध्वनिप्रतिनिधयः।

**अथवा/OR**

यदैव दुर्वृत्तान्तोऽषं कुमारनिग्रहविषयक आकणि तेन स सद्यो व्यवस्थाप्य सूचनाप्रसृतिं परितः, स्वकार्यक्रमं च मामृते कमप्यसूचयित्वा सद्यः सदुर्भटः कौबेरीमाजगामेमां राजधानीम्। येन केन प्रकारेण रक्षणीया एव प्राणाः कुमारस्य लोकपालस्य चेति कमलानिर्दिष्टान् गोपनीयान् मार्गान् अनुसरन् स कारागारद्वारं प्रापत् तास्करी विद्यां च विस्मृतामपि पुनरनुस्मृत्य तालिका कारागारस्योद्घाटयामास प्रविवेश च कारागारकक्षं सदुर्भट इत्येतावतीं कथामहं जाने।

2. बह्मर्षि **अथवा** कुमार का चरित्र–चित्रण कीजिए। 10
Describe the character of Brahmrṣi **OR** Kumāra.

3. प्रमुख आधुनिक संस्कृत रूपकों पर एक निबन्ध लिखिए। 10
Write an essay on main modern Sanskrit dramas.

**अथवा/OR**

भट्ट मथुरानाथ शास्त्री के व्यक्तित्व एवं कर्तृत्व पर प्रकाश डालिए।
Throw light on the life and work of Bhatta Mathuranatha Shastri.

4. निम्नलिखित में से **किन्हीं चार** पर टिप्पणी लिखिए, जिनमें से कोई **एक** टिप्पणी **संस्कृत** में हो। 5+5+5+7=22
Write short note on any **four** of the following, out of which **one** should be in **Sanskrit**.

(i). मनोहर का चरित्रचित्रण — Description of character of Manohara
(ii). राधा का चरित्रचित्रण — Description of character of Rādhā

| | | |
|---|---|---|
| (iii). | सत्यव्रत शास्त्री | Satyavrat Shastri |
| (iv). | हर्षदेव माधव | Harshdev Madhava |
| (v). | मथुराप्रसाद दीक्षित | Mathuraprasad Dikshit |
| (vi). | हृषीकेश भट्टाचार्य | Hrishikesh Bhattacharya |
| (vii). | रमा चौधुरी | Rama Chaudhuri |
| (viii). | केशवचन्द्र दास | Keshavachandra Dasa |